२अल्पे च किम्+चन—अच्। ३हस्तिकर्णपलाशे पु० शब्दरत्ना० "असाकल्ये तु चिच्चन" इत्यमरोक्तेः चनेति भिन्नं पदम् अतएव मयू० अकिञ्चनशब्दो-निपातितः।

**किञ्चित्** अव्य०किम्+चित् किञ्च चिच्च समा० वा।१असाकल्ये, २अल्पे च राजनि०। अस्य पदद्वयत्वमते १अकिञ्चित्कर इत्यादौ सह सुपेति समास इति वोध्यम्। इदन्तया निर्द्देष्टुमशक्यत्वमेव किञ्चित्त्वम्। "कम्पेन किञ्चित् प्रतिगृह्य मूर्ध्नः" रघुः "किञ्चित् प्रकाशस्तिमितोग्रतारैः"। "आवर्ज्जिता किञ्चिदिव स्तनाभ्याम्" कुमा०।

**किञ्चुलुक** पु० किञ्चित् चुलुम्पति सौत्रः चुलुम्प-ड् संज्ञायां कन्। (केंचो) महीलताख्ये कीटभेदे अम० टृषो० किञ्चिलिकोऽप्यत्र अमरटी०। [किन्द्रानशब्दे दृश्यम्।

**किञ्जप्य** न० किञ्चिज्जप्यं यत्र। भा० प्रसिद्धे तीर्थभेदे

**किञ्जल** न० किञ्चित् जलमत्र। पद्मादेः केशरे शब्दर० टृषो० ललोपे" किञ्जलमप्यत्र राजनि०।

**किञ्जल्क** पु०किञ्चित् जलति जल-अपवारणे क तस्य नेत्त्वम्। पुष्पादेः १केशरे,२पुष्परेणौ,३नागकेशरे च मेदि० पद्ममध्यस्थे केशाकारे पदार्थे।"केचित् किञ्जल्कसङ्काशाः केचित् पीताः पयोधराः"भा०व०१८८अ०। "पद्मोदरच्युतरजःकिञ्जल्कारुणतां गतैः" भा०व०१५८अ० "किञ्जल्किनीं ददौ चाब्धिर्मालामम्लानपङ्कजाम्" देवीमा० अमरे पुंस्त्वं जटाधरे क्लीवतेत्युभयलिङ्गता। तद्गुणादिकं भावप्र० उक्तं "किञ्जल्कः शीतलो रूक्षः कषायो ग्राहकोऽपि सः। कफपित्ततृषादाहरक्तार्शोविषशोथजित्" तत्र पुष्पकेशरे "हिरण्मयजोयाजयेयुः वज्रकिञ्जल्काः शतपुष्करा ह्वोतः"आ०श्रौ० ६,४,५"वज्रैः क्रतकिञ्जल्काः क्रतकेशरा" ह्वोतः स्रजःकार्य्याः नारा०

**किट** गतौ सक० भये अक० भ्वा०पर० सेट्। केटति अकेटीत् किकेट प्रनिकटति।

**किटकिटाय** किटकिटेत्यव्यक्तशब्दकरणे डाच्-क्यच्-नामधातुः किटकिटायते अकिटकिटायीत् "दन्तान् किटकिटायते उद्गताचोजिह्वां खादति" सुश्रुतः

**किटि** पु० किट—गतौ इन् किच्च। सूकरे अमरः स्त्रियां भिदन्तत्वात् वा ङीप्

**किटिभ** पु० किटिरिव भाति कृष्णत्वात् भा—क। १केशकीटे (उकुण) हेम०। २सर्पदंशनोपद्रवभेदे न० सुश्रु०। "द्रवः कर्णिकाश्चैव विसर्पाः किटिभानि च। तैर्भवन्तीह दष्टानां यथास्वञ्चाप्युपद्रवाः"।"पिडकोपचयश्शोथाः विसर्पाः किटिभानि च। पर्व्वभेदोरुजस्तीव्रोज्वरोमूर्च्छा च दारुणाः। दौर्बल्यमरुचिश्वासोवमथुर्लोमहर्षणम्। "दृष्टरूपं समासोक्तमेतच्च व्यासतः शृणु" सुश्रु०। तल्लक्षणं तत्रोक्तं यथा। "यत् स्रावि वृत्तं घनमुग्रकण्डु तत् स्निग्धकृष्णं किटिभं वदन्ति"

**किट्ट** न० किट-क्त नि० इडभावः। १धातूनां मले, २तैलाद्यधोभागस्थे मले च"पृथक् किट्टं पृथङ्मलम्" योगार्णवः। "आहारस्य रसः सारः सारहीनो मलद्रवः। सिराभिस्तज्जलं नीतं वस्तिं मूत्रत्वमाप्नुयात्। शेषं किट्टि,च यत्तस्य तत्पुरीषं निगद्यते" भावप्र०।

**किट्टवर्ज्जित** न० ३त०। शुक्रे चरमधातौ यथा च तस्य पाके किञ्चित् मलशून्यत्वं तथोक्तं भावप्र० तच्च अस्थिककरशब्दे ५६०पृ०उक्तम्।

**किट्टाल** पु० किट्टमालाति आ+ला—क। १ताम्रकलसे किट्टरूपेण अलति पर्य्याप्नोति अल—अच्। २लौहमले मेदि०

**किण** पु० कण गतौ अच् टृषो० अत इत्त्वम्। (घँटा)। (कड़ा)१शुष्कव्रणे, २मांसग्रन्थौ, ३घर्षणजे चिह्ने च। "ज्याघातरेखाकिणलाञ्छनेन" रघुः "कराभ्यां किणजाताभ्यां शनकैः संववाहतुः" भा०व० १४४अ०। [शब्दर०

**किणि** स्त्री किणाय तन्निवृत्तये प्रभवति बा० इन्। अपामार्गे

**किणिही** स्त्री किण—अस्त्यर्थे इनि किणिनो व्रणान् हन्ति हन—ड गौ० ङीष्। अपामार्गे अमरः। "इङ्गुदी—किणिही—दन्ती—सरला—देवदारुभिः" सुश्रु०

**किण्व** न० उल्वादि० नि०। १सुरावीजे २ पापे च मेदि० सुरावीजद्रव्यभेदश्च नानाविधः सौत्रामणीशब्दे वक्ष्यते, भावप्र० "सुरावीजन्तु किण्वकम्"इति परिभाष्य"सुरावीजं यवगोधूमतण्डुलादि" इति व्याख्यातं सुश्रुते तु कल्कस्य तण्डुलादितो भिन्नत्वेन निर्द्देशः क्रतः यथा "वैरेचनिकमूलानां क्वाथे माषान् सुभावितान्। सुधौतांस्तत्कषायेण शालीनाञ्चापि तण्डुलान्। अवक्षुद्यै कतः पिण्डान् क्रत्वा शुष्कान् सुचूर्णितान्। शालितण्डुलचूर्णञ्च तत्कषायोष्मसाधितम्। तस्य पिष्टस्य भागांस्त्रीन् किण्वभागविमिश्रितान्। मण्डोदकार्थे क्वाथञ्च दद्यात्तत्सर्व्वमेकतः। निदध्यात्कलसे तान्तु सुरां जातरसां पिवेत्" "किण्वादिभ्योमदशक्तिवत्" सां०सू०। अयं शब्द पु० न० इति भरतः। तस्मै हितम् अपूपा० यत् छ वा किण्व्य किण्वीय तत्साधने द्रव्ये त्रि०